श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीगुरुपवनपुराधीशाय श्रीकृष्णाय परब्रह्मणे नमः

श्री मेल्पत्तूर् नारायणभट्टतिरेः कृतिषु

# ॥ श्रीमन्नारायणीये त्रिषष्टितमं दशकम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

*His Holiness  śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीमन्नारायणीये त्रिषष्टितमं दशकम् ॥

## गोवर्धनोद्धरणवर्णनम्

ददृशिरे किल तत्क्षणमक्षत -
  स्तनितजृम्भितकम्पितदिक्तटाः।
सुषमया भवदङ्गतुलां गता
  व्रजपदोपरि वारिधरास्त्वया ॥ **63.1** ॥

विपुलकरकमिश्रैस्तोयधारानिपातै -
  र्दिशि दिशि पशुपानां मण्डले दण्ड्यमाने।
कुपितहरिकृतान्नः पाहि पाहीति तेषां
  वचनमजित शृण्वन् मा बिभीतेत्यभाणीः ॥ **63.2** ॥

कुल इह खलु गोत्रो दैवतं गोत्रशत्रो -
  र्विहतिमिह स रुन्ध्यात् को नु वः संशयोऽस्मिन्।
इति सहसितवादी देव गोवर्द्धनाद्रिं
  त्वरितमुदमुमूलो मूलतो बालदोर्भ्याम् ॥ **63.3** ॥

तदनु गिरिवरस्य प्रोद्धृतस्यास्य तावत्
  सिकतिलमृदुदेशे दूरतो वारितापे।
परिकरपरिमिश्रान् धेनुगोपानधस्ता -
  दुपनिदधदधत्था हस्तपद्मेन शैलम् ॥ **63.4** ॥

भवति विधृतशैले बालिकाभिर्वयस्यै -
  रपि विहितविलासं केलिलापादिलोले।

सविधमिलितधेनूरेकहस्तेन कण्डू -
यति सति पशुपालास्तोषमैषन्त सर्वे ॥ **63.5** ॥

अतिमहान् गिरिरेष तु वामके
करसरोरुहि तं धरते चिरम्।
किमिदमद्भुतमद्रिबलं न्विति
त्वदवलोकिभिराकथि गोपकैः ॥ **63.6** ॥

अहह धार्ष्ट्यममुष्य वटोर्गिरं
व्यथितबाहुरसाववरोपयेत्।
इति हरिस्त्वयि बद्धविगर्हणो
दिवससप्तकमुग्रमवर्षयत् ॥ **63.7** ॥

अचलति त्वयि देव पदात् पदं
गलितसर्वजले च घनोत्करे।
अपहृते मरुता मरुताम्पति -
स्त्वदभिशङ्कितधीः समुपाद्रवत् ॥ **63.8** ॥

शममुपेयुषि वर्षभरे तदा
पशुपधेनुकुले च विनिर्गते।
भुवि विभो समुपाहितभूधरः
प्रमुदितैः पशुपैः परिरेभिषे ॥ **63.9** ॥

धरणिमेव पुरा धृतवानसि
क्षितिधरोद्धरणे तव कः श्रमः।
इति नुतस्त्रिदशैः कमलापते
गुरुपुरालय पालय मां गदात् ॥ **63.10** ॥

॥ इति श्रीमन्नारायणीये त्रिषष्टितमं दशकं समाप्तम् ॥